# संस्कृतवार्ता:

**दिनाङ्क :-20.11.2024** **प्रात: - 06:55**

**अथ वार्ता:**

**झारखण्ड-महाराष्ट्रमतदानम्**

झारखण्ड-महाराष्ट्रराज्ययो: अद्य विद्यानसभा-निर्वाचनाय मतदानस्य सर्वा: सज्जता: व्यवस्थिता:। झारखण्डे द्वितीयाय अन्तियाय च चरणाय द्वादश-जनपदानाम् अष्टत्रिंशदासनेभ्य: मतदानं समनुष्ठास्यते। मतदानं प्रात: सप्तवादनात् समारप्स्यते सायंकाले पञ्चवादनं यावत् प्रचलिष्यति। एतस्मिन् चरणे अष्टाविंशत्यधिक-पञ्चशतं प्रत्याशिन: नैर्वाचनिकरणे सङ्घर्षरता: सन्ति। झारखण्डस्य मुख्य-निर्वाचनाधिकारी के. रविकुमार: मतदातृभि: आग्रहं कृतवात् यत्ते भयेन विना मतदानं कुर्वन्तु इति। तत्रैव महाराष्ट्रराज्ये सर्वेभ्य: अष्टाशीत्यधिक-द्विशतम् आसनेभ्य: एकस्मिन्नेव चरणे मतदानं विधास्यते। मतदानं सप्तवादनत: सायंकाले षड्वादनपर्यन्तं प्रचलिष्यति। महाराष्ट्रस्य मुख्यनिर्वाचनाधिकारी एस चोकलिंगम: सूचितवान् यत् राज्ये भूयोऽपि पञ्चलक्षं यावत् मतदातृकर्मिण: सप्तविंशत्यधिक-चतुश्शतोत्तरैकलक्षं मतदातृकेन्द्राणां प्रबन्धनं करिष्यन्ति। महाराष्ट्रस्य नान्देड़-संसदीयक्षेत्रस्य चतुर्णां पञ्जाब-उत्तरप्रदेश-केरल-उत्तराखण्ड-राज्यानां पञ्चदशविधानसभासनेभ्य: उपनिर्वाचनमपि विधास्यते। अपरत्र मतगणना त्रयोविंशदिनाङ्के भविष्यति।

**जी-20 सम्मेलनम्**

नवदशतमस्य जी-20 इति शिखरसम्मेलनस्य समापनं राष्ट्रपतिना लूला-डा-सिल्वा-इत्यनेन राष्ट्रपतिं सिरिल-रामाफोसा-इत्येनं कर्तव्यं समर्पय जातम् जी-20 नेतृणां शिखरसम्मेलनामलनाय स्वीये समापन-भाषणे राष्ट्रपति: लूला: ब्राजीलदेशस्य अध्यक्षतायां विहितानां पदक्षेपाणां विषये वार्तां कथितवान्। येषु बुभुक्षां निर्धनतां च विरूध्य वैश्विक-एकरूपताया: प्रारम्भ: अथ च वैश्विकशासनम् इतोऽपि सुदृढ़ीकर्तुं प्रारूपस्य उद्घाटनमिति। पुनश्च महिला शक्तिकरण कार्य समूहस्य स्थापना इति सम्मिलिता: वर्तन्ते।

**प्रधानमन्त्री-जी-20 सम्मेलनम्**

प्रधानमन्त्री नरेन्द्रमोदी सततविकास-ऊर्जापरिवर्तनयो: जी-20 इत्येतस्य शिखरसम्मेलनस्य द्वितीयदिवसस्य प्रथमं सत्रं सम्बोधितवान्। प्रधानमन्त्रिणा समुदीरितं यत् नवदिल्ल्याम् आयोजिते जी-20 शिखर सम्मेलनावधौ समूहेन ऊर्जा-उत्पादनं त्रिगुणीकर्तुं संकल्प: सङ्कल्पित:। असौ सतत-विकास-प्राथमिकता: अग्रे वर्धायितुं ब्राजीलदेशस्य निर्णयस्य स्वागतं कृतवान्। भारतेन कृतपदक्षेपा: अपि तत्र उत्थापिता: ।

**प्रधानमन्त्रिगुआनायात्रा**

प्रधानमन्त्री नरेन्द्रमोदी स्वीयस्य ब्राजीलदेशस्य सफलप्रवासस्य अनन्तरं गुयानायाः त्रिदिवसीययात्रार्थं प्रस्थितः । कस्यापि भारतीय-प्रधानमन्त्रिणः अष्टषष्ट्यधिक-नवदश-शततमवर्षस्य उपरान्ते प्रथमा इयं गुयानायात्रास्ति। श्रीमोदी जॉर्जटॉउन-नगरे गुयानायाः राष्ट्रपतिना डॉ. मोहम्मद-इरफान-अली-इत्यमुना साकं चर्चां करिष्यति। प्रधानमन्त्री अत्रावधौ द्वितीये कैरिकॉम-भारत-शिखर-सम्मेलनेऽपि भागं भजिष्यति अपि च अनेन क्षेत्रेण सह भारतस्य दीर्घकालिक-मैत्रीपूर्ण-सम्बन्धं समेधितुं कैरिकॉम-इत्यस्य सदस्यदेशानां नेतृभिस्साकम् उपवेशनानि करिष्यति।

**चलचित्रमहोत्सवः**

पञ्चपञ्चाशत्तमः भारत-अन्ताराष्ट्रिय-चलचित्र-महोत्सवः अद्य गोवाराज्ये समारप्स्यते। इदं भव्यम् आयोजनम् अस्य मासस्य अष्टाविंशतिदिनाङ्कं यावत् प्रचलिष्यते। गोवाराज्यस्य मुख्यमन्त्री डॉ. प्रमोदसांवतः व्यवस्थां समीक्षितुं डॉ. श्यामा-प्रसाद-मुखर्जी-सभागारस्य भ्रमणं कृतवान्। आकाशवाण्या सह सम्भाषमाणः श्रीसांवतः प्रख्यापितवान् यत् सर्वविध-व्यवस्थाः तत्र सम्पूरिताः। अद्य सायं चतुर्वादने उद्घाटन-समारोहमपि भविष्यति। सूचनाप्रसारण-सचिवः सञ्जय-जाजू इत्येषः अपि सूचितवान् यत् एतस्मिन् महोत्सवे नैके नवीनाः कार्यक्रमाः अपि योजिताः।

**हॉकीतिप्रतिस्पर्धा**

हॉकीतिप्रतिस्पर्धायाम् अद्य सायं काले पादोनपञ्चवादने बिहारप्रदेशस्य राजगीर- हॉकी - क्रीडाङ्गणे महिलानां एशियाई - हॉकी -चैम्पियनट्रॉफीइत्यस्याः स्पर्धायाः अन्त्यचक्रे भारतं चीनदेशेन सह क्रीडिष्यति।

**।।इति वार्ताः।।**